**Nepal Sanskrit University** Symbol No.:______________

# प्राक्शास्त्री

## २०७९

**विषयः :- ऐ. संस्कृत व्याकरणम्**

**पत्रम् :- तृतीयम्** **समयः - २० मिनेट**

### खण्ड-क

**समीचीनोत्तरस्य प्रकोष्ठे ☑ संकेतो देयः –** २०×१ = २०

१. माहेश्वरसूत्रेषु चतुर्दशसूत्रं किमस्ति ?
(क) लण् ☐ (ख) कपय् ☐
(ग) शषसर् ☐ (घ) हल् ☐

२. बाह्यप्रयत्नाः कति सन्ति ?
(क) अष्टौ ☐ (ख) नव ☐ (ग) दश ☐ (घ) एकादश ☐

३. वृद्धिसंज्ञाविधायकं सूत्रं किमस्ति ?
(क) वृद्धिरेचि ☐ (ख) इको गुणवृद्धि ☐
(ग) मृजेर्वृद्धिः ☐ (घ) वृद्धिरादैच् ☐

४. 'रो रिः' इति सूत्रं किं कार्यं करोति ?
(क) दीर्घः ☐ (ख) रेफस्य लोपः ☐
(ग) यादेशः ☐ (घ) षत्वम् ☐

५. रामशब्दस्य सप्तम्येकवचने किं रूपं भवति ?
(क) रामः ☐ (ख) रामे ☐ (ग) रामाय ☐ (घ) रामेषु ☐

६. वधूशब्दस्य तृतीयैकवचने कीदृशं रूपं भवति ?
(क) वध्वाः ☐ (ख) वधूभ्याम् ☐ (ग) वध्वा ☐ (घ) वधूः ☐

७. गोशब्दस्य द्वितीयाबहुवचनस्य रूपं किमस्ति ?
(क) गाः ☐ (ख) गाम् ☐ (ग) गावः ☐ (घ) गावौ ☐

८. नदीशब्दस्य चतुर्थ्येकवचने कीदृशं रूपं भवति ?
(क) नद्यै ☐ (ख) नदीः ☐ (ग) नद्या ☐ (घ) नद्याः ☐

९. 'जसि च' अस्य सूत्रस्योदाहरणं किमस्ति ?
(क) हरयः ☐ (ख) हरिणा ☐ (ग) हरये ☐ (घ) हरीन् ☐

१०. 'गतिश्च' अनेन सूत्रेण का संज्ञा क्रियते ?
(क) लोपसंज्ञा ☐ (ख) उपधासंज्ञा ☐
(ग) गतिसंज्ञा ☐ (घ) ङित्संज्ञा ☐

११ समया अस्य अव्ययशब्दस्य कोऽर्थः ?
(क) समीपे ☐ (ख) दूरे ☐ (ग) परे ☐ (घ) इतरे ☐

**क्रमशः**

१२. 'षिद्गौरादिभ्यश्च' अनेन किं करोति ?
(क) ङीप् ☐ (ख) ङीष् ☐ (घ) ङीन् ☐ (ङ) ति ☐

१३. गार्गी इत्यत्र ङीप् विधायकं सूत्रं किमस्ति ?
(क) यञश्च ☐ (ख) उगितश्च ☐ (ग) स्त्रियाम् ☐ (घ) पङ्गोश्च ☐

१४. 'अकथितं च' अनेन सूत्रेण का संज्ञा भवति ?
(क) कर्मसंज्ञा ☐ (ख) करणसंज्ञा ☐ (ग) सम्प्रदानसंज्ञा ☐ (घ) कर्तृसंज्ञा ☐

१५. 'पितृभ्यः स्वधा' इत्यस्मिन् केन सूत्रेण चतुर्थीविभक्तिर्भवति ?
(क) चतुर्थी सम्प्रदाने ☐
(ख) साधकतमं करणम् ☐
(ग) नमः स्वस्तिस्वाहास्वधालंवषट्योगाश्च ☐
(घ) कर्मणि द्वितीया ☐

१६. 'अपादाने पञ्चमी' अस्य सूत्रस्योदाहरणं किमस्ति ?
(क) राम आयाति ☐ (ख) राज्ञः पुरुषः ☐
(ग) ग्रामादायाति ☐ (घ) सतां गतम् ☐

१७. हरि ङि अधि इति विग्रहे कः समासो भवति ?
(क) तत्पुरुषः ☐ (ख) अव्ययीभावः ☐ (ग) द्विगुः ☐ (घ) बहुव्रीहिः ☐

१८. रूपस्य योग्यम् अस्य विग्रहस्य समस्तरूपं किमस्ति ?
(क) अनुरूपम् ☐ (ख) अनुज्येष्ठम् ☐ (ग) सचक्रम् ☐ (घ) अनुविष्णु ☐

१९. घनश्यामः शब्दस्य कीदृशो विग्रहो भवति ?
(क) घनस्य श्यामः ☐ (ख) घन इव श्यामः ☐
(ग) घनानां श्यामः ☐ (घ) घनश्च श्यामश्च ☐

२०. 'द्वन्द्वे घिः' अनेन सूत्रेण किं क्रियते ?
(क) घिसंज्ञकस्य परप्रयोगः ☐ (ख) घिसंज्ञकस्य पूर्वप्रयोगः ☐
(ग) घिसंज्ञकस्य मध्यप्रयोगः ☐ (घ) घिसंज्ञकस्य उत्तरप्रयोगः ☐

–: o :–

**Nepal Sanskrit University** **[P.S.]**

# प्राक्शास्त्री
## २०७९

पूर्णाङ्काः - १००

विषयः :- ऐ. संस्कृतव्याकरणम् उत्तीर्णाङ्काः - ४०

पत्रम् :- तृतीयम् समयः - घण्टात्रयम्

| | |
|---|---|
| (क) | परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैश्शब्दैर्लेखनीयम् । |
| (ख) | दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ॥ |

## खण्ड-ख

चतुर्दश प्रश्नाः समाधेयाः – १४×४ = ५६

१. व, ष वर्णयोराभ्यन्तरप्रयत्नं लिखित्वा 'उपदेशेऽजनुनासिक इत्' अस्य सूत्रस्यार्थं लिखत ।

अथवा

उपदेशपदार्थः कः ? माहेश्वरसूत्राणां प्रयोजनं च किम् ?

२. संयोग-वृद्धि-उपसर्ग-धातुसंज्ञाविधायकानि सूत्राणि लिखत ।

३. रामेण, पितरः, सम्भवे एषु द्वौ प्रयोगौ साधयत ।

४. 'अर्थवदधातुरप्रत्ययः प्रातिपादिकम्' अस्य सूत्रस्यार्थं लिखत ।

अथवा

रमायै, सर्वस्मिन्, ज्ञानानि एषु द्वौ प्रयोगौ साधयत ।

५. स्वर्, युगपत्, सायम्, समया एतान् अव्ययशब्दान् प्रयुज्य एकैकं वाक्यं रचयत ।

६. 'इन्द्रवरुण....' सूत्रं पूरयित्वा एकमुदाहरणञ्च लिखत ।

अथवा

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥
अस्य पद्यस्यार्थं लिखत ।

७. 'वोतो गुणवचनात्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

८. हरये नमः, वलिं याचते वसुधाम्, अधिशेते वैकुण्ठं हरिः एषु द्वयोः कारकप्रक्रियां दर्शयत ।

९. 'आधारोऽधिकरणम्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

१०. अधस्तनशब्दानां लौकिकविग्रहं दर्शयत–

(क) अधिगोपम् (ख) पञ्चगवम्

(ग) कुपुरुषः (घ) पीताम्बरो हरिः

क्रमशः

११. अधस्तनशब्दानां समस्तरूपाणि लिखत–

(क) गङ्गा ङस उप (ख) हरि टा त्रात सु

(ग) चोर ङसि भय सु (घ) पाणि औ पाद औ

१२. 'चतुर्थीतदर्थार्थवलिहितसुखरक्षितैः' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

१३. नीलञ्चतदुत्पलम् अस्य समस्तरूपं विलिख्य, 'उपमानानि सामान्यवचनैः' इति सूत्रस्योदाहरणमर्थञ्च लिखत ।

१४. 'कर्तृकरणे कृता बहुलम्' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

अथवा

इतिहरि, पौर्वशालः, मातापितरौ, रुपवद्भार्यः एषां समस्तशब्दानां लौकिक विग्रहं दर्शयत ।

## खण्ड-ग

त्रयः प्रश्नाः समाधेया – ३×८ = २४

१५. सुद्ध्युपास्यः, रमेशः, उपोषति, रामश्चिनोति, जगदीशः एषु चतुरः प्रयोगान् प्रमुखसूत्रनिर्देशपूर्वकं साधयत ।

अथवा

गङ्गौघः, ब्रह्मर्षिः, तट्टीका एषु द्वौ प्रयोगौ संसाध्य 'अतो रोरप्लुतादप्लुते' अस्य सूत्रस्यार्थं लिखत ।

१६. चतुरः, मातुः, पन्थाः, द्यौः, अद्भिः एषु चतुरः प्रयोगान् साधयत ।

१७. अव्ययीभावतत्पुरुषसमासयोर्लक्षणमुदाहरणञ्च लिखत ।

अथवा

'द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' अस्य सूत्रस्योदाहरणमर्थञ्च लिखत ।

–: ० :–